# Shri Sankata Ratrikalina Stutih

# श्रीसङ्कटारात्रिकालीनस्तुतिः

## Document Information

Text title : sankaTArAtrikAlInastutiH

File name : sankaTArAtrikAlInastutiH.itx

Category : devii, otherforms, devI

Location : doc_devii

Proofread by : Rajesh Thyagarajan

Description/comments : Collection of shlokas from various sources

Latest update : December 4, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 4, 2022

*sanskritdocuments.org*

# श्रीसङ्कटारात्रिकालीनस्तुतिः

दुर्गे स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि ।
दारिद्र्य-दुःख-भय-हारिणि का त्वदन्या
सर्वोपकार-करणाय सदाऽऽर्द्रचित्ता ॥ १॥

या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः
पापात्मनां कृतधियां हृदयेषु बुद्धिः ।
श्रद्धा सतां कुलजनप्रभवस्य लज्जा
तां त्वां नताः स्म परिपालय देविविश्वम् ॥ २॥

रोगानशेषानपहंसि तुष्टा
रुष्टा तु कामान् सकलानभीष्टान् ।
त्वामाश्रितानां न विपन्नराणां
त्वामाश्रिता ह्याश्रयतां प्रयान्ति ॥ ३॥

या कुन्देन्दु-तुषार-हार-धवला या शुभ्रवस्त्रावृता
या वीणा-वरदण्ड-मण्डितकरा या श्वेतपद्मासना ।
या ब्रह्माऽच्युत-शङ्कर-प्रभृतिभिर्देवैः सदा वन्दिता
सा मां पातु सरस्वती भगवती निश्शेषजाड्यापहा ॥ ४॥

या माया मधुकैटभ-प्रमथिनी या माहिषोन्मूलनी
या, धूम्रेक्षण-चण्ड-मुण्डमथिनी या रक्तबीजासिनी ।
शक्तिः शुम्भ-निशुम्भ-दैत्यदलिनी या सिद्धिलक्ष्मीः परा
सा दुर्गा नवकोटिशक्तिसहिता मां पातु विश्वेश्वरी ॥ ५॥

मध्ये दुग्धपयोनिधौ त्रिघटिका हेमस्तनी नन्दनं
तन्मध्ये मणिमण्डपं तदुपरि श्रीचक्रराजान्वितम् ।
तस्मिन् पाश-धनुःशराङ्कुशधरां माणिक्यभूषालसां
मुक्ताहार-पयोधरां त्रिनयनां वन्दे परां सुन्दरीम् ॥ ६॥

सुधासिन्धोर्मध्ये सुर-विटप-वाटी-परिवृते
मणिद्वीपे नीपोपवनवति चिन्तामणिगृहे ।
शिवाकारे मञ्चे परमशिव-पर्यङ्कनिलयां
भजन्ति त्वां धन्याः कतिचन चिदानन्दलहरीम् ॥ ७॥

शुक्लां ब्रह्मविचारसारपरमामाद्यां जगद्व्यापिनीं
वीणा-पुस्तक-धारिणीमभयदां जाड्यान्धकारापहाम् ।
हस्ते स्फाटिकमालिकां विदधतीं पद्मासने संस्थितां
वन्दे त्वां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम् ॥ ८॥

चतुर्भुजे चन्द्रकलावत्तंसे कुचोन्नते कुङ्कुमरागशोणे ।
कोदण्ड-पाशाङ्कुश-पुष्पबाण-हस्ते नमस्ते जगदेकमातः ॥ ९॥

अरुणां करुणात्तरङ्गिताक्षीं धृत-पाशाङ्कुश-पुष्प-बाण-चापम् ।
अणिमादिभिरावृतां मयूखै-रहमित्येव विभावये भवानीम् ॥ १०॥

ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥ ११॥

ॐ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रे पार्श्वेनक्षत्राणिरूपमश्विनौ व्यात्तम् ।
इष्णन्निषाणामुं म इषाण सर्वलोकं म इषाण ॥ १२॥

विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतो बाहुरुत विश्वतस्पात् ।
सम्बाहुभ्यां धमति सम्पतत्रैर्द्यावा-भूमिं जनयन्देव एकः ॥ १३॥

इति सङ्कटा-रात्रिकालीन स्तुतिः समाप्ता ।

Proofread by Rajesh Thyagarajan

*Shri Sankata Ratrikalina Stutih*
pdf was typeset on December 4, 2022

Please send corrections to *sanskrit@cheerful.com*